# विविधप्रश्नावलिः - २

१. एकपदेन उत्तरं लिखत–

(क) कः देशरक्षां करोति?

(ख) उज्जयिन्याः प्रसिद्धस्थानं किम् अस्ति?

(ग) चन्द्रः कासां भूषणम् अस्ति?

(घ) मध्यप्रदेशः कुत्र विराजते?

(ङ) आदिकविः कः अस्ति?

(च) जम्बूवृक्षः कुत्र आसीत्?

(छ) कः उच्चैः गर्जति?

२. रिक्तस्थानं पूरयत–

(क) शास्त्रं ............... अस्ति। (पण्डिताः/पाण्डिताय)

(ख) श्रीरामः ............. पुत्रः। (दशरथस्य/दशरथेन)

(ग) भोपालनगरं मध्यप्रदेशस्य ................ अस्ति। (राजधानी/राजधानीम्)

(घ) सीतायाः विवाहः ................. सह अभवत्। (रामस्य/रामेण)

(ङ) मयूरः अस्माकं ............. पक्षी अस्ति। (राष्ट्रियः/राष्ट्रीयम्)

(च) सिंहः उच्चैः ................। (गर्जति/गर्जेत)

३. समीचीनं चिनुत (आम्/न)–

(क) अस्माभिः जलसंरक्षणम्, वायुसंरक्षणम्, भूसंरक्षणम् अवश्यं करणीयम्। (   )

(ख) स्वास्थ्यं ज्ञानाय परिश्रमाय न भवति। (   )

(ग) प्राचीनकालात् आरभ्य उज्जयिनीक्षेत्रं संस्कृतविद्याकेन्द्रमस्ति। (   )

(घ) विद्या सर्वस्य भूषणं नास्ति। (   )

(ङ) संस्कृतभाषा वेदानाम् उपनिषदां शास्त्राणां च भाषा वर्तते। (   )

(च) नर्मदायाः दक्षिणतटे विन्ध्याचलः अस्ति। (   )

(छ) मध्यप्रदेशस्य मध्ये नर्मदा नदी अस्य मेखला इव प्रवहति। (   )

(ज) दशरथस्य आज्ञया रामः राज्यं त्यक्त्वा वनम् अगच्छत्। (   )

(झ) लक्ष्मणेन रामः युद्धे घातितः। (   )

४. अधोलिखितानि पदानि प्रयुज्य वाक्यानि लिखत–

| | | |
|---|---|---|
| सूर्यः | लोकहिताय | वहन्ति |
| नद्यः | उज्जयिनीम् | आगच्छन्ति |
| मन्दिरात् | परोपकाराय | श्रूयते |
| यात्रिकाः | घण्टानादः | तपति |

५. अक्षराणि प्रयुज्य पदचक्रं पूरयत–

ला, धु, भा, भा, स, षा

| यथा | सं | स्कृ | त | भा | षा |
|---|---|---|---|---|---|
| (क) | म | | रा | | षा |
| (ख) | | र | त | भू | |
| (ग) | | र | | भा | षा |

६. अधोलिखितानि वाक्यानि यथाक्रमं लिखत–

(क) वने राक्षसराजः रावणः सीतां कपटेन अहरत्।

(ख) रामः सीता लक्ष्मणः च अयोध्याम् प्रत्यागच्छन्।

(ग) वानराः सागरे सेतुनिर्माणम् अकुर्वन्।

(घ) रामेण रावणः युद्धे घातितः।

(ङ) विश्वामित्रः रामलक्ष्मणौ स्वाश्रमम् अनयत्।

७. योजयत–

| | (अ) | (ब) |
|---|---|---|
| (क) | सूर्यः | गर्जति |
| (ख) | सिंहः | नृत्यति |
| (ग) | हरिणः | तपति |
| (घ) | मयूरः | धावति |

८. रेखाङ्कितपदानि लङ्लकारे परिवर्तयत–

एकः पिपासितः काकः <u>अस्ति</u>। सः जलं पातुम् इच्छति। सः ग्रीष्मकालः अस्ति बहुत्र विहरति, पश्यति, किन्तु जलं न <u>मिलति</u>। काकः एकं घटं <u>पश्यति</u>, समीपं